# A-II/2/2336/ 21

## चतुर्थसत्रार्द्धम्

## द्वितीयपत्रम्

## साहित्यम्

समयः घण्टात्रयम् पूर्णाङ्काः 80

अ. सर्वे अतिलघूत्तरीयाः प्रश्नाः समाधेयाः। (15×2=30)

1. ललनालावण्यप्रख्यः अर्थः कः?
2. लावण्यसिन्धुरपरैव इत्यादिपद्ये व्यङ्ग्यार्थः कः?
3. व्यङ्ग्यांशानुगमे सति प्रायेण परां छायां कः बिभ्रति?

**अथवा**

अतिशयोक्तिगर्भता कुत्र शक्यक्रिया भवति?

4. प्रतीयमानच्छाया कीदृशी भूषा।
5. अर्थान्तरगतेः काक्वा परिदृश्यमाने कीदृशं गुणीभूतव्यङ्ग्यत्वम्?
6. रीतयः काः?

**अथवा**

काव्यलक्षणे ज्ञाते काः प्रकाशन्ते?

7. काव्यस्य सर्वस्मिन् प्रकारे कस्य अर्थस्य स्पर्शेन सौभाग्यम्?
8. कवीनां प्रतिभागुणः केन आनन्त्यम् आयाति?
9. तिरस्कृतवाच्यध्वनिसमाश्रयेण अपूर्वत्वं कथम्?
10. के नवा इवाभान्ति?

**अथवा**

महाभारते अङ्गीरसः कः?

11. "भगवान् वासुदेवश्च कीर्त्यतेऽत्र सनातनः" इति श्लोकवाक्येन किं प्रतिपाद्यते?
12. कः आनन्त्यम् आयाति?

**अथवा**

'स्मितं किञ्चिन्मुग्धम्' इत्यादिपद्यं कस्य उदाहरणम्?

13. काव्यमार्गः कस्मात् अनन्ततां प्राप्तः?

14. रसपरिग्रहः कुत्र भवेत्?

**अथवा**

'एवं वादिनि देवर्षौ' इत्यादिश्लोके नवत्वं कथम्?

15. कस्मिन् काव्ये मोक्षलक्षणः पुरुषार्थः विवक्षाविषयत्वेन सूचितः?

**ब. सर्वे लघूत्तरीयाः प्रश्नाः समाधेयाः।** **(5×6=30)**

16. 'अनन्ता हि वाग्विकल्पाः तत्प्रकारा एव चालङ्काराः' इति ग्रन्थोक्तदिशा व्याख्यात।

17. प्रकारोऽयं गुणीभूतव्यङ्ग्योऽपि ध्वनिरूपताम्। धत्ते रसादितात्पर्यपर्यालोचनया पुनः॥

–इति कारिकां व्याख्यात।

**अथवा**

रामायणे करुणस्य अङ्गित्वं साधयत।

18. चित्रकाव्यं सप्रभेदं निरूपयत।

**अथवा**

मुख्या महाकविगिरामलङ्कृतिभृतामपि। प्रतीयमानच्छायैषा भूषा लज्जेव योषिताम्॥

–इति कारिकां व्याख्यात।

19. राजानमपि सेवन्ते विषमप्युपभुञ्जते। रमन्ते च सह स्त्रीभिः कुशलाः खलु मानवाः॥

–ससन्दर्भं व्याख्यात।

20. अतो ह्यन्यतमेनापि प्रकारेण विभूषिता। वाणी नवत्वमायाति पूर्वार्थान्वयवत्यपि॥

–व्याख्यात।

**अथवा**

व्यङ्ग्यव्यञ्जकभावेऽस्मिन् विविधे सम्भवत्यपि। रसादिमय एकस्मिन् कविः स्यादवधानवान्॥

–कारिकां व्याख्यात।

**स. निबन्धात्मकः प्रश्नः समाधेयः।** **(1×20=20)**

21. अलङ्काराणां वक्रोक्तिगर्भत्वं वक्रोक्तेः महत्त्वं च प्रतिपादयत।

**अथवा**

महाभारते अङ्गीरसः शान्तः इति ध्वन्यालोकदिशा प्रतिपादयत।

**अथवा**

'संवादा तु भवन्त्येव' इति यथाग्रन्थं साधयत।